[1]तीक्ष्णम्, तिग्मम्[2].

(720) " तिज निशाने " (X. चुरादिः-1653. सक. सेट्. उभ.)

'—शातने' इति कुत्रचित् पाठः।

तेजकः-जिका, तितेजयिषकः-षिका, तेजयिता-त्री, तितेजयिषिता-त्री; इत्यादीनि सर्वाणि रूपाणि पूर्वस्मिन् धातावेव (719) प्रदर्शितानि बोध्यानि। पूर्वं भ्वादौ पठितस्यैव स्वार्थसन्नन्तस्य धातोः अर्थान्तरे चुरादित्वस्य भाष्यादिसम्मतत्वात् चुरादिषु पाठ उन्नेयः। ण्यन्तात् सनि तु—तितेजयिषकः-षिका, तितेजयिषिता-त्री, तितेजयिषन्-न्ती, तितेजयिषिष्यन्-न्ती-ती, तितेजयिषमाणः, तितेजयिषिष्यमाणः, तितेजयिट्-यिषौ-यिषः, तितेजयिषितः-तवान्, तितेजयिषुः, तितेजयिषितव्यम्, तितेजयिषणीयम्, तितेजयिष्यम्, ईषत्तितेजयिषः-दुस्तितेजयिषः-सुतितेजयिषः, तितेजयिष्यमाणः, तितेजयिषः, तितेजयिषितुम्, तितेजयिषा, तितेजयिषणम्, तितेजयिषित्वा, प्रतितेजयिष्य, तितेजयिषम् २ तितेजयिषित्वा २. इति रूपाणीति विशेषः।

(721) " तिपृ क्षरणार्थः " (I-भ्वादिः-362. अक. अनि. आत्म.) [अ]

तेपकः-पिका, तेपकः-पिका, तितिप्सकः-सिका, तेतिपकः-पिका; तेप्ता-त्री, तेपयिता-त्री, तितिप्सिता-त्री, तेतिपिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि दैवादिकक्षिपधातुवत् (306) ज्ञेयानि। अस्य धातोरात्मनेपदित्वात् शानचि—तेपमानः, तेप्स्यमानः, तितिप्समानः, तितिप्सिष्यमाणः; इत्यादीनि रूपाणि भवन्तीति विशेषः।

(722) " तिम आर्द्रीभावे " (IV-दिवादिः-1123. अक. सेट्. पर.)

तेमकः-मिका, तेमकः-मिका, तितिमिषकः-तितेमिषकः-षिका, तेतिमकः-मिका; तेमिता-त्री, तेमयिता-त्री, तितिमिषिता-तितेमिषिता-त्री, तेतिमिता-त्री; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककिट (190)

---

1. 'तिजेर्दीर्घश्च' [द. उ. 5-50] इति क्स्नप्रत्यये दीर्घः।

2. 'युजिरुचितिजां कुश्च' [द. उ. 7-33] इति मक्प्रत्ययः, तत्सन्नियोगेन कवर्गादेशश्च। तिग्मम्=तीक्ष्णम्।

[अ] 'क्षीरस्वामी तु, अयं (धातुः) सेट् इति बभ्राम।' इति सिद्धान्तकौमुदी। यतस्तत्र (क्षीरतरङ्गिण्यां) क्त्वायाम्—'क्विति विशेषः—तिपित्वा, तेपित्वा' इत्युक्तम्।